विद्युद्दूतः vidyud-dūtaḥ

क्रमाङ्कः षष्ठः Issue: Sixth

वसुधैव कुटुम्बकम्
INTERNATIONAL ASSOCIATION OF SANSKRIT STUDIES
अन्ताराष्ट्रियसंस्कृताध्ययनसमवायः

१/७/२०१३ 1/7/2013

# *अपि नाम संस्कृतं लोकभाषा आसीत् ?*

सरोजा भाटे

अपि नाम कदाचित् संस्कृतं जनतायाः कस्याश्चित् व्यवहारभाषा आसीत्? विषयेऽस्मिन् भाषाशास्त्रविदां भूयसां योऽभिप्रायः तस्यायं सारः —

संस्कृतमित्यभिधानमेव भाषाया अस्याः संसूचयति यदियं संस्कारैर् गुणाधानेन अलङ्कारिता अतः निर्मिता न तु स्वाभाविकी लोकभाषा इति। वेदवाङ्मये उपलभ्यमानमस्याः इदंप्रथमं रूपमपि शिल्पमिव सुघटितं सुश्लिष्टं च यथोक्तमेकस्यां ऋचि सक्तुमिव तितउना पुनन्तः यत्र धीरा मनसा वाचमक्रत इति। तदाप्रभृति मन्त्रकृद्भिः ऋषिभिर् यागादिकर्मानुष्ठानार्थं प्रयत्नविशेषैः सौष्ठवमापादिता इयं भाषा केवलं पुरोहितवर्गस्य शिष्टानां चान्येषां व्यवहारभाषासीत्। प्राकृता जनास्तु विविधाः लोकभाषाः प्रयुञ्जते स्म याः प्राकृतम् इति अभिधानमलभन्त उत्तरकाले। संस्कृतप्राकृतयोस्तु सोदर्यं सामान्यमासीत् यमभगिनीवत्। क्रिस्ताब्दात् पूर्वं पञ्चमे शतके जातः पाणिनिर् महावैयाकरणः शिष्टैर् व्यवह्रियमाणायाः संस्कृतभाषायाः व्याकरणं व्यरचयद् इति पाणिनीयपरम्परापि मन्यते। पाणिनिना व्याकरणनियमैः परिष्कृता संस्कृतवाणी संस्कृततरा समभवत्। परमं सौष्ठवमापन्नायामस्यां भाषायां तदुत्तरवर्तिनि काले न केवलं काव्यनाटकादि साहित्यम् अपि तु न्यायव्याकरणमीमांसादर्शनादि शास्त्रीयं वाङ्मयमपि व्यरीरचन् प्रतिभाशालिनः कवयः प्रज्ञावन्तश्च शास्त्रकृतः। गच्छता कालेन प्राकृतभाषाः अधिकतरं व्यवहारभाजः समृद्धाः अभवन्। संस्कृतभाषा तावत् पाणिनिव्याकरणाल्लब्धं सुप्रतिष्ठं स्वरूपमास्थाय सथिरीभूता। अतः स्वीयं व्यवहारभाषारूपं विहाय वाङ्मयभाषारूपमेव बभार। अद्यत्वे यद्यपि केचन संस्कृतेन संभाषन्ते संभाषणानुकूलेयमिति चानुभूयते तथापि न संस्कृतं क्वापि व्यवहारभाषा मातृभाषावत् प्रयुज्यमाना दृश्यते, न अतीते न वर्तमाने इति।

अत्रेदं वक्तुं शक्यते – भाष्यते इति भाषा। एस्पेरान्तोसदृशाः कृत्रिमभाषास्तावद् अपवादभूताः। विश्वेऽस्मिन् सर्वासां भाषाणां मूलरूपं स्वाभाविकभाषा लोकभाषा इत्येव। अनेन न्यायेन संस्कृतं मूलतः लोकभाषैव।

यद्यपि संस्कृतस्यादिमं रूपं वेदवाङ्मये उपलभ्यते तथापि एतावता सा आरम्भादेव शिष्टभाषासीदिति न मन्तव्यम् । पुरा काले शिष्टाशिष्टसामान्ये समाजे सा लोकभाषासीत् । नदीवत् प्रवहन्तीयं भाषा मन्त्रकृद्भिर् ऋषिभिः संस्कृतं रूपं प्रापिता । पाणिनीयव्याकरणे यदस्याः रूपं दृश्यते तत् लोक-भाषाया एव न केवलं शिष्टभाषायाः । महत्या सूक्ष्मेक्षिकया संस्कृतप्रयोगान् वर्णयता पाणिनिना न केवलं देशकालभेदानुसारम् अपि तु वक्त्रभिप्रायभावभेदानुसारं ये प्रयोगविशेषाः उल्लिखिताः सर्वेऽपि ते विशेषाः संस्कृतस्य लोकभाषात्वं प्रख्यापयन्ति । अतः पाणिनिकालं यावत् संस्कृतं लोकभाषासीदिति तु निश्चप्रचम् । अत एव फिल्योझामहोदयेन यदुक्तं *The Sanskrit Language: an Overview* इत्यस्मिन् ग्रन्थे (मूलफ्रेंचतः आंग्लभाषायामनूदिते) “Panini has received the spoken language from his parents and the Vedic texts from his masters” (पृष्ठं 27), तथा च “Panini’s language is then, the sum of a Vedic heritage and transposition of Middle Indian into this mould” (पृष्ठं 28), इति समीचीनमेव तद् इति शम् ।

---

## *।। इतः पूर्वम् अप्रकाशितं प्रासंगिकं किंचित् काव्यम् ।।*

अशोक अकलूजकर

। द्वे समस्या-पूरणे ।

१. अमेरिकीयस्य पौरस्त्य-परिशीलन-मण्डलस्य वार्षिके संमिलने प्राध्यापकेन श्रीमता माधव-देशपाण्डे-महोदयेन “पीयते कापि काफी”ति वृत्त-खण्डम् एक-नवाष्टैक-मिते क्रिस्ताब्दे मार्च-मासेऽष्टादशे दिने समस्या-पूरणार्थं मत्-पुरतः स्थापितम् । अत्र “पीयते कापि कॉफी”त्यस्य ‘वर्णनातीत-स्वादा कॉफी पीयत’ इत्यर्थः । तदनुसारि यत् पद्य-पूरणं कर्तुम् अहम् अपारयं तद् अधो दीयते ।

On 18 March 1981, in a meeting of the American Oriental Society, Professor Madhav M. Deshpande gave me the following verse part for *samasyā-pūrti:* पीयते कापि कॉफी (= a coffee defying description is drunk). What I could come up with was this:

मधु-मधुर-शरीरां शर्करां संश्रितानि
सहज-रुचि-पयांसि श्रीणनाद् गन्धितानि ।
यदि विजहति देहं चूर्णितैलादि-राशौ [= चूर्णित + एला + आदि-राशौ]
स्फुरदधर-युगं, भोः, पीयते कापि कॉफी ।।

२. एक-नव-द्वि-क्रमाङ्कम् अमेरिकीयस्य पौरस्त्य-परिशीलन-मण्डलस्य संमिलनम् एक-नवाष्ट-द्वि-मिते क्रिस्ताब्दे मार्च-मासे टेक्सस्-प्रान्तीय ऑस्टिन्-नगरे संपन्नम् । तदानीम्, ऊन-त्रिंशे दिने, श्रीमता विदुषा राम-करण-शर्मणा 'भारते संस्कृताध्ययनम्' इतीमं विषयम् अधिकृत्य निबन्धः पठितः । तस्मिन्, 'भारतीयेषु संस्कृतज्ञेषु समस्या-पूर्ति-स्पर्धाः कथं भवन्ती'त्यस्य विवरणे तेन "तरन्ति नावो, न वयं तरामः" इत्येष पद्य-पादो निदर्शनार्थं निर्दिष्टः । स चौज्जयनीये कालिदास-महोत्सव उपस्थितैर् विद्वद्भिः कथम् अविद्यमानं पाद-त्रयं संयोज्य संगतार्थ-प्रतिपादकं पूर्णं पद्य-रूपं प्रापित इत्यपि तेन पद्य-द्वयं श्रावयित्वा स्पष्टीकृतम् । 'किम् अहम् अपि तथा पद्य-विरचनं कर्तुं शक्नुयाम्' इति निश्चिचीषुणा मया यत् पद्यं यथा-कथमपि प्रणीतं तद् एवं-रूपम् ।

In the 192nd meeting of the American Oriental Society held at Austin, Texas, Dr Ram Karan Sharma read a paper on "Sanskrit Studies in India" on 29 March 1982. As an example of the *samasyā-pūrti* competitions that take place among Sanskritists in India he cited the verse quarter: तरन्ति नावो, न वयं तरामः and gave an example or two of how the verse was completed by the participating Sanskritists in the Kālidāsa-mahotsava at Ujjain. Just to check if I could meet the challenge faced by those Sanskritists, I struggled and wrote the following:

नौ-निर्मितं सेतुम् अथेन्स-राजो (= Alexander)
बद्ध्वागतः पौरव-नाशनाय । (= Porus)
गजाहते त्वात्म-बलेऽवदत् स
तरन्ति नावो, न वयं तरामः ॥

---

। वृत्त-वैविध्य-विहारः ।

३. नास्ति मम तावद् वृत्त-रचना-कौशलं यावत् श्री-राम-करण-शर्मणः, श्री-वेम्पति-कुटुम्ब-शास्त्रिणः, श्री-राधा-वल्लभ-त्रिपाठिनो वा । कदाचिन् मम पुत्रेणायुष्मता मुक्तकेनाहम् उक्तः, "पुनः पुनः परिचितेष्वेवानुष्टुप्-शिखरिणी-शार्दूल-विक्रीडितादिषु वृत्तेषु बद्धानि पद्यानि मा प्रणीयन्ताम्, अहं प्रमदानन-रथोद्धता-प्रमुदित-वदनाख्येषु वृत्तेषु बद्धानि पद्यानि श्रोतुम् इच्छामी"ति । ततो मम मनस्ययं कल्प आविर्भूतः, "प्रत्यासन्नः श्री-राम-नवम्युत्सवः; वृत्त-रचनाभ्यासोऽपि मया कर्तव्यः"; तद्, राम-कथा-गतान् एव कांश्चित् प्रसङ्गान् मनसि कृत्वा, पुत्रेष्टेषु वृत्तेषु लेखनी-व्यापारणं करिष्यामी"ति । कृते सति बह्वायासे व्यापारणे, यः पद्य-गणो निष्पन्नः, सोऽधः प्रदीयते । सांख्य-मतम् अनुसृत्य, कारण-गत आयासः कार्येऽप्यागतः स्यात् । स पठितॄणां पीडां नोत्पादयेद् इत्याशासे ।

Vibhīṣaṇa, joining Rāma's side, says *(pramadānana):*

कुलतोऽस्मि यद्यपि राक्षसो, मतिर् आसुरी न तथापि मे ।
अनुजोऽस्मि रावण-वंशके, अनुगस् तु नास्मि निसर्गतः ।। अ ।।
परिहर्तुम् आत्म-विनाशनं प्रतिबोधितोऽपि मयाग्रजः ।
श्रुतवान् ममाहित-वारणं न वचो दशानन उन्मदः ।। आ ।।
श्रुति-मात्रतस् तव नाम मे हृदि भक्तिम् आहितवत् स्थिराम् ।
न मतिर् दुरात्म-सहायतां विदधीत मे क्वचिद् अप्य् असौ ।। इ ।।
अभिराम राम, विधेहि मे तव पाद-सेवकतां ध्रुवाम् ।
कुरु मां खलोद्धरणोचितं शरम् एकम् अन्य-शरेषु ते ।। ई ।।

Indrajit's sacrifice is destroyed by Hanumat (*rathoddhatā*):

यावद् इन्द्रजिद् असौ निरीक्षते यातु-यज्ञ-जनितं रथं स्वकम् ।
तावद् एव हनुमान् शिलास्त्रधृत् तं मनो-रथ-समं व्यनाशयत् ।। उ ।।

Rāma's army celebrates Rāvaṇa's defeat: (*pramudita-vadanā*):

गगन-गति-रथो मृतः शक्रजिद् , ऋषि-सुर-सुख-हन् मृतो रावणः ।
मुदम् अनुभवतात् समं सीतया जगद् इदम् अनया प्रभोर् लीलया ।। ऊ ।।

विद्युद्दूतस्य षष्ठोऽङ्कः समाप्तः